॥ वाल्मीकि रामायण॥

६ युद्धकाण्ड

अध्याय ६०

ततो हतान्राक्षसपुङ्गवांस्तान्
देवान्तकादित्रिशिरोऽतिकायान् ।
रक्षोगणास्तत्र हतावशिष्टास्
ते रावणाय त्वरितं शशंसुः ॥ १॥

ततो हतांस्तान्सहसा निशम्य
राजा मुमोहाश्रुपरिप्लुताक्षः ।
पुत्रक्षयं भ्रातृवधं च घोरं
विचिन्त्य राजा विपुलं प्रदध्यौ ॥ २॥

ततस्तु राजानमुदीक्ष्य दीनं
शोकार्णवे सम्परिपुप्लुवानम् ।
अथर्षभो राक्षसराजसूनुर्
अथेन्द्रजिद्वाक्यमिदं बभाषे ॥ ३॥

न तात मोहं प्रतिगन्तुमर्हसि
यत्रेन्द्रजिज्जीवति राक्षसेन्द्र ।
नेन्द्रारिबाणाभिहतो हि कश् चित्
प्राणान्समर्थः समरेऽभिधर्तुम् ॥ ४॥

पश्याद्य रामं सहलक्ष्मणेन
मद्बाणनिर्भिन्नविकीर्णदेहम् ।
गतायुषं भूमितले शयानं
शरैः शितैराचितसर्वगात्रम् ॥ ५॥

इमां प्रतिज्ञां शृणु शक्रशत्रोः
सुनिश्चितां पौरुषदैवयुक्ताम् ।
अद्यैव रामं सहलक्ष्मणेन
सन्तापयिष्यामि शरैरमोघैः ॥ ६॥

अद्येन्द्रवैवस्वतविष्णुमित्र
साध्याश्विवैश्वानरचन्द्रसूर्याः ।
द्रक्ष्यन्ति मे विक्रममप्रमेयं
विष्णोरिवोग्रं बलियज्ञवाटे ॥ ७॥

स एवमुक्त्वा त्रिदशेन्द्रशत्रुर्
आपृच्छ्य राजानमदीनसत्त्वः ।
समारुरोहानिलतुल्यवेगं
रथं खरश्रेष्ठसमाधियुक्तम् ॥ ८॥

समास्थाय महातेजा रथं हरिरथोपमम् ।
जगाम सहसा तत्र यत्र युद्धमरिन्दम ॥ ९॥

तं प्रस्थितं महात्मानमनुजग्मुर्महाबलाः ।
संहर्षमाणा बहवो धनुःप्रवरपाणयः ॥ १०॥

गजस्कन्धगताः के चित्के चित्परमवाजिभिः ।
प्रासमुद्गरनिस्त्रिंश परश्वधगदाधराः ॥ ११॥

स शङ्खनिनदैर्भीमैर्भेरीणां च महास्वनैः ।
जगाम त्रिदशेन्द्रारिः स्तूयमानो निशाचरैः ॥ १२॥

स शङ्खशशिवर्णेन छत्रेण रिपुसादनः ।
रराज परिपूर्णेन नभश्चन्द्रमसा यथा ॥ १३॥

अवीज्यत ततो वीरो हैमैर्हेमविभूषितैः ।
चारुचामरमुख्यैश्च मुख्यः सर्वधनुष्मताम् ॥ १४॥

ततस्त्विन्द्रजिता लङ्का सूर्यप्रतिमतेजसा ।
रराजाप्रतिवीर्येण द्यौरिवार्केण भास्वता ॥ १५॥

स तु दृष्ट्वा विनिर्यान्तं बलेन महता वृतम् ।
राक्षसाधिपतिः श्रीमान्रावणः पुत्रमब्रवीत् ॥ १६॥

त्वमप्रतिरथः पुत्र जितस्ते युधि वासवः ।
किं पुनर्मानुषं धृष्यं न वधिष्यसि राघवम् ॥ १७॥

तथोक्तो राक्षसेन्द्रेण प्रतिगृह्य महाशिषः ।
रथेनाश्वयुजा वीरः शीघ्रं गत्वा निकुम्भिलाम् ॥ १८॥

स सम्प्राप्य महातेजा युद्धभूमिमरिन्दमः ।
स्थापयामास रक्षांसि रथं प्रति समन्ततः ॥ १९॥

ततस्तु हुतभोक्तारं हुतभुक्सदृशप्रभः ।
जुहुवे राक्षसश्रेष्ठो मन्त्रवद्विधिवत्तदा ॥ २०॥

स हविर्जालसंस्कारैर्माल्यगन्धपुरस्कृतैः ।

जुहुवे पावकं तत्र राक्षसेन्द्रः प्रतापवान् ॥ २१॥

शस्त्राणि शरपत्राणि समिधोऽथ विभीतकः ।
लोहितानि च वासांसि स्रुवं कार्ष्णायसं तथा ॥ २२॥

स तत्राग्निं समास्तीर्य शरपत्रैः सतोमरैः ।
छागस्य सर्वकृष्णस्य गलं जग्राह जीवतः ॥ २३॥

सकृदेव समिद्धस्य विधूमस्य महार्चिषः ।
बभूवुस्तानि लिङ्गानि विजयं यान्यदर्शयन् ॥ २४॥

प्रदक्षिणावर्तशिखस्तप्तकाञ्चनसंनिभः ।
हविस्तत्प्रतिजग्राह पावकः स्वयमुत्थितः ॥ २५॥

सोऽस्त्रमाहारयामास ब्राह्ममस्त्रविदां वरः ।
धनुश्चात्मरथं चैव सर्वं तत्राभ्यमन्त्रयत् ॥ २६॥

तस्मिन्नाहूयमानेऽस्त्रे हूयमाने च पावके ।
सार्कग्रहेन्दु नक्षत्रं वितत्रास नभस्तलम् ॥ २७॥

स पावकं पावकदीप्ततेजा
हुत्वा महेन्द्रप्रतिमप्रभावः ।
सचापबाणासिरथाश्वसूतः
खेऽन्तर्दध आत्मानमचिन्त्यरूपः ॥ २८॥

स सैन्यमुत्सृज्य समेत्य तूर्णं
महारणे वानरवाहिनीषु ।
अदृश्यमानः शरजालमुग्रं
ववर्ष नीलाम्बुधरो यथाम्बु ॥ २९॥

ते शक्रजिद्बाणविशीर्णदेहा
मायाहता विस्वरमुन्नदन्तः ।
रणे निपेतुर्हरयोऽद्रिकल्पा
यथेन्द्रवज्राभिहता नगेन्द्राः ॥ ३०॥

ते केवलं सन्ददृशुः शिताग्रान्
बाणान्रणे वानरवाहिनीषु ।
माया निगूढं च सुरेन्द्रशत्रुं
न चात्र तं राक्षसमभ्यपश्यन् ॥ ३१॥

ततः स रक्षोऽधिपतिर्महात्मा
सर्वा दिशो बाणगणैः शिताग्रैः ।
प्रच्छादयामास रविप्रकाशैर्
विषादयामास च वानरेन्द्रान् ॥ ३२॥

स शूलनिस्त्रिंश परश्वधानि
व्याविध्य दीप्तानलसंनिभानि ।
सविस्फुलिङ्गोज्ज्वलपावकानि
ववर्ष तीव्रं प्लवगेन्द्रसैन्ये ॥ ३३॥

ततो ज्वलनसङ्काशैः शितैर्वानरयूथपाः ।
ताडिताः शक्रजिद्बाणैः प्रफुल्ला इव किंशुकाः ॥ ३४॥

अन्योन्यमभिसर्पन्तो निनदन्तश् च विस्वरम् ।
राक्षसेन्द्रास्त्रनिर्भिन्ना निपेतुर्वानरर्षभाः ॥ ३५॥

उदीक्षमाणा गगनं के चिन्नेत्रेषु ताडिताः ।
शरैर्विविशुरन्योन्यं पेतुश्च जगतीतले ॥ ३६॥

हनूमन्तं च सुग्रीवमङ्गदं गन्धमादनम् ।
जाम्बवन्तं सुषेणं च वेगदर्शिनमेव च ॥ ३७॥

मैन्दं च द्विविदं नीलं गवाक्षं गजगोमुखौ ।
केसरिं हरिलोमानं विद्युद्दंष्ट्रं च वानरम् ॥ ३८॥

सूर्याननं ज्योतिमुखं तथा दधिमुखं हरिम् ।
पावकाक्षं नलं चैव कुमुदं चैव वानरम् ॥ ३९॥

प्रासैः शूलैः शितैर्बाणैरिन्द्रजिन्मन्त्रसंहितैः ।
विव्याध हरिशार्दूलान्सर्वांस्तान्राक्षसोत्तमः ॥ ४०॥

स वै गदाभिर्हरियूथमुख्यान्
निर्भिद्य बाणैस्तपनीयपुङ्खैः ।
ववर्ष रामं शरवृष्टिजालैः
सलक्ष्मणं भास्कररश्मिकल्पैः ॥ ४१॥

स बाणवर्षैरभिवर्ष्यमाणो
धारानिपातानिव तान्विचिन्त्य ।
समीक्षमाणः परमाद्भुतश्री
रामस्तदा लक्ष्मणमित्युवाच ॥ ४२॥

असौ पुनर्लक्ष्मण राक्षसेन्द्रो
ब्रह्मास्त्रमाश्रित्य सुरेन्द्रशत्रुः ।
निपातयित्वा हरिसैन्यमुग्रम्
अस्माञ्शरैरर्दयति प्रसक्तम् ॥ ४३॥

स्वयम्भुवा दत्तवरो महात्मा
खमास्थितोऽन्तर्हितभीमकायः ।
कथं नु शक्यो युधि नष्टदेहो
निहन्तुमद्येन्द्रजिदुद्यतास्त्रः ॥ ४४॥

मन्ये स्वयम्भूर्भगवानचिन्त्यो

यस्यैतदस्त्रं प्रभवश् च योऽस्य ।
बाणावपातांस्त्वमिहाद्य धीमन्
मया सहाव्यग्रमनाः सहस्व ॥ ४५ ॥

प्रच्छादयत्येष हि राक्षसेन्द्रः
सर्वा दिशः सायकवृष्टिजालैः ।
एतच्च सर्वं पतिताग्र्यवीरं
न भ्राजते वानरराजसैन्यम् ॥ ४६ ॥

आवां तु दृष्ट्वा पतितौ विसंज्ञौ
निवृत्तयुद्धौ हतरोषहर्षौ ।
ध्रुवं प्रवेक्ष्यत्यमरारिवासं
असौ समादाय रणाग्रलक्ष्मीम् ॥ ४७ ॥

ततस्तु ताविन्द्रजिदस्त्रजालैर्
बभूवतुस्तत्र तदा विशस्तौ ।
स चापि तौ तत्र विषादयित्वा
ननाद हर्षाद्युधि राक्षसेन्द्रः ॥ ४८ ॥

स तत्तदा वानरराजसैन्यं
रामं च सङ्ख्ये सहलक्ष्मणेन ।
विषादयित्वा सहसा विवेश
पुरीं दशग्रीवभुजाभिगुप्ताम् ॥ ४९ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com